# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ६७

मकराक्षं हतं श्रुत्वा रावणः समितिञ्जयः ।
आदिदेशाथ सङ्क्रुद्धो रणायेन्द्रजितं सुतम् ॥ १॥

जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ ।
अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः ॥ २॥

त्वमप्रतिमकर्माणमिन्द्रं जयसि संयुगे ।
किं पुनर्मानुषौ दृष्ट्वा न वधिष्यसि संयुगे ॥ ३॥

तथोक्तो राक्षसेन्द्रेण प्रतिगृह्य पितुर्वचः ।
यज्ञभूमौ स विधिवत्पावकं जुहुवे न्द्रजित् ॥ ४॥

जुह्वतश्चापि तत्राग्निं रक्तोष्णीषधराः स्त्रियः ।
आजग्मुस्तत्र सम्भ्रान्ता राक्षस्यो यत्र रावणिः ॥ ५॥

शस्त्राणि शरपत्राणि समिधोऽथ विभीतकाः ।
लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ॥ ६॥

सर्वतोऽग्निं समास्तीर्य शरपत्रैः समन्ततः ।
छागस्य सर्वकृष्णस्य गलं जग्राह जीवतः ॥ ७॥

चरुहोमसमिद्धस्य विधूमस्य महार्चिषः ।
बभूवुस्तानि लिङ्गानि विजयं दर्शयन्ति च ॥ ८॥

प्रदक्षिणावर्तशिखस्तप्तहाटकसंनिभः ।
हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥ ९॥

हुत्वाग्निं तर्पयित्वाथ देवदानवराक्षसान् ।
आरुरोह रथश्रेष्ठमन्तर्धानगतं शुभम् ॥ १०॥

स वाजिभिश्चतुर्भिस्तु बाणैश्च निशितैर्युतः ।
आरोपितमहाचापः शुशुभे स्यन्दनोत्तमे ॥ ११॥

जाज्वल्यमानो वपुषा तपनीयपरिच्छदः ।
शरैश्चन्द्रार्धचन्द्रैश्च स रथः समलङ्कृतः ॥ १२॥

जाम्बूनदमहाकम्बुर्दीप्तपावकसंनिभः ।
बभूवेन्द्रजितः केतुर्वैदूर्यसमलङ्कृतः ॥ १३॥

तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः ।
स बभूव दुराधर्षो रावणिः सुमहाबलः ॥ १४॥

सोऽभिनिर्याय नगरादिन्द्रजित्समितिञ्जयः ।
हुत्वाग्निं राक्षसैर्मन्त्रैरन्तर्धानगतोऽब्रवीत् ॥ १५॥

अद्य हत्वाहवे यौ तौ मिथ्या प्रव्रजितौ वने ।
जयं पित्रे प्रदास्यामि रावणाय रणाधिकम् ॥ १६॥

कृत्वा निर्वानरामुर्वीं हत्वा रामं सलक्ष्मणम् ।
करिष्ये परमां प्रीतिमित्युक्त्वान्तरधीयत ॥ १७॥

आपपाताथ सङ्क्रुद्धो दशग्रीवेण चोदितः ।
तीक्ष्णकार्मुकनाराचैस्तीक्ष्णस्त्विन्द्ररिपू रणे ॥ १८॥

स ददर्श महावीर्यौ नागौ त्रिशिरसाविव ।
सृजन्ताविषुजालानि वीरौ वानरमध्यगौ ॥ १९॥

इमौ ताविति सञ्चिन्त्य सज्यं कृत्वा च कार्मुकम् ।
सन्ततानेषुधाराभिः पर्जन्य इव वृष्टिमान् ॥ २०॥

स तु वैहायसं प्राप्य सरथो रामलक्ष्मणौ ।
अचक्षुर्विषये तिष्ठन्विव्याध निशितैः शरैः ॥ २१॥

तौ तस्य शरवेगेन परीतौ रामलक्ष्मणौ ।
धनुषी सशरे कृत्वा दिव्यमस्त्रं प्रचक्रतुः ॥ २२॥

प्रच्छादयन्तौ गगनं शरजालैर्महाबलौ ।
तमस्त्रैः सुरसङ्काशौ नैव पस्पर्शतुः शरैः ॥ २३॥

स हि धूमान्धकारं च चक्रे प्रच्छादयन्नभः ।
दिशश्चान्तर्दधे श्रीमान्नीहारतमसावृतः ॥ २४॥

नैव ज्यातलनिर्घोषो न च नेमिखुरस्वनः ।
शुश्रुवे चरतस्तस्य न च रूपं प्रकाशते ॥ २५॥

घनान्धकारे तिमिरे शरवर्षमिवाद्भुतम् ।

स ववर्ष महाबाहुर्नाराचशरवृष्टिभिः ॥ २६ ॥

स रामं सूर्यसङ्काशैः शरैर्दत्तवरो भृशम् ।
विव्याध समरे क्रुद्धः सर्वगात्रेषु रावणिः ॥ २७ ॥

तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ ।
हेमपुङ्खान्नरव्याघ्रौ तिग्मान्मुमुचतुः शरान् ॥ २८ ॥

अन्तरिक्षं समासाद्य रावणिं कङ्कपत्रिणः ।
निकृत्य पतगा भूमौ पेतुस्ते शोणितोक्षिताः ॥ २९ ॥

अतिमात्रं शरौघेण पीड्यमानौ नरोत्तमौ ।
तानिषून्पततो भल्लैरनेकैर्निचकर्ततुः ॥ ३० ॥

यतो हि ददृशाते तौ शरान्निपतिताञ्शितान् ।
ततस्ततो दाशरथी ससृजातेऽस्त्रमुत्तमम् ॥ ३१ ॥

रावणिस्तु दिशः सर्वा रथेनातिरथः पतन् ।
विव्याध तौ दाशरथी लघ्वस्त्रो निशितैः शरैः ॥ ३२ ॥

तेनातिविद्धौ तौ वीरौ रुक्मपुङ्खैः सुसंहतैः ।
बभूवतुर्दाशरथी पुष्पिताविव किंशुकौ ॥ ३३ ॥

नास्य वेद गतिं कश्चिन्न च रूपं धनुः शरान् ।
न चान्यद्विदितं किं चित्सूर्यस्येवाभ्रसम्प्लवे ॥ ३४ ॥

तेन विद्धाश्च हरयो निहताश्च गतासवः ।
बभूवुः शतशस्तत्र पतिता धरणीतले ॥ ३५ ॥

लक्ष्मणस्तु सुसङ्क्रुद्धो भ्रातरं वाक्यमब्रवीत् ।
ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम् ॥ ३६ ॥

तमुवाच ततो रामो लक्ष्मणं शुभलक्षणम् ।
नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि ॥ ३७ ॥

अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम् ।
पलायन्तं प्रमत्तं वा न त्वं हन्तुमिहार्हसि ॥ ३८ ॥

अस्यैव तु वधे यत्नं करिष्यावो महाबल ।
आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान् ॥ ३९ ॥

तमेनं मायिनं क्षुद्रमन्तर्हितरथं बलात् ।
राक्षसं निहनिष्यन्ति दृष्ट्वा वानरयूथपाः ॥ ४० ॥

यद्येष भूमिं विशते दिवं वा
रसातलं वापि नभस्तलं वा ।
एवं निगूढोऽपि ममास्त्रदग्धः
पतिष्यते भूमितले गतासुः ॥ ४१ ॥

इत्येवमुक्त्वा वचनं महात्मा
रघुप्रवीरः प्लवगर्षभैर्वृतः ।
वधाय रौद्रस्य नृशंसकर्मणस्
तदा महात्मा त्वरितं निरीक्षते ॥ ४२ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com